तत्स्मृतमिति"। रुक् उपतापः भयादिजनीय उपतापस्तदन्वितैरित्यन्वयः। अपवर्जितं दत्तं बालादिभिरपवर्जितमित्यन्वयः। एतदुक्तं भवति भयोपतप्तेन वन्दिग्राहादिभ्यो दत्तं क्रोधोपतप्तेन क्रोधविषयीभूतानां पुत्त्रभ्रात्रादीनां भयं कर्त्तुमितरेभ्यो दत्तम्। पुत्रादिवियोगजनितशोकवेगादुपतप्तेन किं स्थितेन धनेनेति तात्कालिक्या बुद्ध्या दत्तम्। उत्कोचेन राजकीयादिभ्यो दत्तम्। उपहासेन दत्तम्। व्यत्यासेन एकः स्वद्रव्यमन्यस्मै ददाति अन्योऽपि स्वीयन्तस्मै ददातीति दानव्यत्यासेन दत्तम्। छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य दत्तम्। बालेनाप्राप्तव्यवहारेण दत्तं मूढ़ेन लोकवेदानभिज्ञेन दत्तम्। अस्वतन्त्रेण दासादिना दत्तम्। आर्त्तेन रोगोपहतेन दत्तम्। मत्तेन धुस्तूरादिभक्षणादिना मत्तेन दत्तम् उन्मत्तेन वातपित्ताद्युद्रेकादिना चलितधिया दत्तम्। अयं मदीयं कर्म करिष्यतीति प्रतिलाभेच्छया प्रतिलाभमकुर्वाणाय दत्तम्। अपात्रायायोग्याय योग्योऽहम् इत्युक्तिमात्रेण दत्तम्। यज्ञादिं करिष्यामीत्युक्त्वा धनं गृहीत्वा द्यूतादिकर्म्मणि विनियुञ्जानाय दत्तं इत्येवं षोड़शप्रकारमपि दत्तं पुनः प्रत्याहरणीयत्वाददत्तमुच्यत इत्यर्थः। पुनःप्रत्याहरणीयत्वमेवंविधानामाह कात्यायनः "कामक्रोधास्वतन्त्रार्त्तक्लीवोन्मत्तप्रमोहितैः। व्यत्यासपरिहाराय यद्दत्तन्तत्पुनर्हरेत्। या तु कार्य्यप्रसिद्ध्यर्थमुत्कोचा स्यात्प्रतिक्रिया। तस्मिन्नपि प्रसिद्धेऽर्थे न देया स्यात्कथञ्चन। अथ प्रागेव दत्ता स्यात्प्रतिदाप्यस्ततो बलात्। दण्डं चैकादशगुणमाहुर्गार्ग्यमानवाः" उत्कोचस्वरूपमाह स एव। "स्तेयसाहसिकोद्वृत्तपारदारिकशंसनात्। दर्शनाद्वृत्तनष्टस्य तथाऽसत्यप्रवर्त्तनात्। प्राप्तमेतैस्तु यत्किञ्चिदुत्कोचाख्यं तदुच्यते। न दाता तत्र दण्ड्यः स्यान्मध्यस्थश्चैव दोषभागिति" एतदुक्तं भवति यदि मह्यं न प्रयच्छसि तदा त्वत्कृतं स्तेयादि कथयामीति भीतिमुत्पाद्य स्तेयादिकर्त्तुः सकाशाद्धनमादत्ते। तथा त्वं यदि धनं मह्यन्न प्रयच्छसि तदा पलायमानं त्वां दर्शयामीति भीतिमुत्पाद्य पलायिनः सकाशाद्यत्किञ्चिदादत्ते तथा तव सत्यमपि स्वामिनिकटेऽसत्यं वदिष्यामीत्युक्त्वा यत्किञ्चिदादत्ते तदुत्कोचाख्यं तद्दाता दात्रे दाप्यम् उत्कोचापादकग्राहकौ च दण्डनीयाविति पुनः प्रत्याहरणीयमिति बृहस्पतिरप्याह प्रतिलाभेच्छया दत्तमपात्रे पात्रशङ्कया। कार्य्ये वाधर्म्मसंयुक्ते स्वामी तत्पुनराप्नुयादिति"। आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयम्। तथा च कात्यायनः "स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात्। अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः" इति। मनुरपि सोपाधिकदानादेर्निवर्त्तनमाह "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यस्य वाप्युपधिम्पश्येत्तत्सर्वं विनिवर्त्तयेदिति"। योग उपाधिः येनागामिनोपाधिविशेषेणाधिविक्रयादानप्रतिग्रहाः कृतास्तदुपाधिविगमे ते सर्वेऽपि निवर्त्तेरन्नित्यर्थः।"

**दत्तामित्र** पु० सौवीरे नृपभेदे। "दत्तामित्र इति ख्यातं संग्रामे कृतनिश्चयम्। सुमित्रं नाम सौवीरमर्ज्जुनोदमयच्छरैः" भा० आ० १३८ अ०।

**दत्ति** स्त्री दा—क्तिन् ददादेशः। दाने "अनुगृह्णीष्व निवापदत्तिभिः" रघुः [अ।

**दत्तिक** त्रि० अल्पो दत्तः ठक्। अल्पदत्ते। दत्तान्तशब्दात् मनुष्यनाम्नः घन् इलच् ठ क वा। देवदत्त+यज्ञदत्त+स्वार्थाद्यर्थे घादौ पूर्वपदलोपे दत्तिय, दत्तिल दत्तिक दत्तक देवदत्त यज्ञदत्त सोमदत्तादौ।

**दत्तेय** पुंस्त्री०दत्ताया अपत्यम् ढक्। १दत्ताया दत्तककन्याया अपत्ये २इन्द्रे पु० हेमच० दन्तेयेति वा तत्र पाठः।

**दत्तोलि** पु० पुलस्त्यसुनौ विष्णुपु०।

**दत्र** न० दा—बा० कत्रन्। १धने "इन्द्र! यत्ते माहिनं दत्रम्" ऋ० ३।३६।६। "दत्रं धनम्" भा०। "दत्रे विश्वा अधिथा इन्द्र! कृष्टीः" ऋ० ४।१७।६। "दत्रे धने" भा०।२हिरण्ये निरु० "यो दत्रवाँ उषसो न प्रतीकम्" ऋ० ६।५०।८।

**दत्त्रिम** त्रि० दानेन निर्वृत्तः दा—क्ति—त्रिमप् च। १दाननिर्वृत्ते। "निष्ठां गते दत्त्रिमसभ्यतोषे" भट्टिः। "माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः" इत्युक्ते २दत्तकपुत्रे पु०।

**दद** दाने धृतौ च भ्वा० आ० सक० सेट्। ददते अददिष्ट दददे। "विटविटपममुं ददस्व तस्यै" माघः। [त्रार्थे।

**दद** त्रि० दा—बा० श। दातरि। पक्षे आदन्तत्वात् यः दाय

**ददन** न० दद—भावे ल्युट्। दाने शब्दर०।

**ददि** त्रि० दा—कि द्वित्वम्। दानकर्त्तरि। [विदारणशीले।

**ददृत्** त्रि०दीर्य्यति दृ—क्विप् ह्रस्वः द्वित्वं तुकम्। दीर्य्यति।

**ददृशान** त्रि० दृश—शानच्। दृष्टे "अस्य शुष्मासो ददृशानपवे-